## नगरात् कुत्सनप्रावीण्ययोः । (१२८/१३५२)

नगरशब्दात् वुञ् प्रत्ययो भवति शैषिकः कुत्सने प्रावीण्ये च गम्यमाने । प्रत्ययार्थविशेषणं चैतत्, कुत्सने [1]प्रावीण्ये च जातादौ प्रत्ययार्थ इति । कुत्सनं निन्दनम् । प्रावीण्यं [2]नैपुण्यम् ।

केनायं मुषितः [3]पन्था गात्रे पक्ष्मालिधूसरः ।

इह नगरे मनुष्येण सम्भाव्यत एतन्नागरकेण । चोरा हि नागरका भवन्ति ।

[4]केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत् ।

इह नगरे मनुष्येण सम्भाव्यत एतन्नागरकेण । [5]प्रवीणा हि नागरका भवन्ति । कुत्सनप्रावीण्ययोः इति किम्? नागरा ब्राह्मणाः । कत्र्यादिषु तु सञ्ज्ञाशब्देन साहचर्यात् सञ्ज्ञानगरं पठ्यते, तस्मिन् नागरेयकम् इति प्रत्युदाहार्यम् ॥

## अरण्यान्मनुष्ये । (१२९/१३५३)

अरण्यशब्दाद् वुञ् प्रत्ययो भवति शैषिको मनुष्येऽभिधेये । औपसङ्ख्यानिकस्य णस्यापवादः । आरण्यको मनुष्यः ।

[४४०] पथ्यध्यायन्याय[6]विहारमनुष्यहस्तिषु इति वक्तव्यम् । (म. भा. २.२९९)

आरण्यकः पन्थाः । आरण्यकोऽध्यायः । [7]आरण्यको न्यायः । आरण्यको [8]विहारः । आरण्यको मनुष्यः । आरण्यको हस्ती ।

[४४१] वा गोमयेषु ।

आरण्याः, आरण्यका गोमयाः । एतेषु इति किम् ? आरण्याः पशवः ॥

## विभाषा कुरुयुगन्धराभ्याम् । (१३०/१३५४)

कुरु युगन्धर इत्येताभ्यां विभाषा वुञ् प्रत्ययो भवति शैषिकः । कौरवकः, कौरवः । यौगन्धरकः, [9]यौगन्धरः (म.भा. २.३००) । जनपदशब्दावेतौ, [10]ताभ्यामवृद्धादपि इति नित्ये[11] वुञि प्राप्ते विकल्प उच्यते । कुरुशब्दः कच्छादिष्वपि पठ्यते, तत्र वचनादणपि भविष्यति । [12]सैषा युगन्धरार्था विभाषा । मनुष्यतत्स्थयोः (४.२.१३४/१३५८) तु कुरुशब्दान् नित्य एव वुञ् [13]प्रत्ययो भवति, [14]कौरवको मनुष्यः, कौरवकमस्य हसितम् (म.भा. २.३००) इति ॥

## मद्रवृज्योः कन् । (१३१/१३५५)

मद्रवृजिशब्दाभ्यां कन् प्रत्ययो भवति शैषिकः । जनपदवुञोऽपवादः । मद्रेषु जातः मद्रकः । [15]वृजिकः ॥

---

1. प्रावीण्ये नास्ति फ. 2. नैपुणम् ब. 3. रागः ह, पन्थाः – धूसरः नास्ति ब, गात्रपक्ष्मालिधूसरः इ. 4. तेनेदं मुषितं ड. ह, तनेदं लिखितं हिमनगरे ब. 5. चौरा हि नागरकाः ब. 6. व्यवहार इ. 7. उदाहरणमिदं नास्ति क. 8. व्यवहारः इ. 9. यौगन्धरः नास्ति फ. 10. क्षत्रियाभिधायकौ इत्यधिकम् फ. 11. बहुवचनविषये इत्यधिकम् फ. 12. पारिशेष्यात् अ.ब.ग. 13. प्रत्ययः नास्ति फ. 14. कौरवको मनुष्यः नास्ति फ. 15. वृजिषु भवः इत्यधिकम् फ.